# Taratamya Stotram

# તારતમ્યસ્તોત્રમ્

## Document Information


Text title : tAratamyastotram by kalyANI

File name : tAratamyastotrakalyANI.itx

Category : deities_misc

Location : doc_deities_misc

Transliterated by : Srividya Guruprasad

Proofread by : Srividya Guruprasad

Latest update : December 30, 2021

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.



February 2, 2024

*sanskritdocuments.org*

# તારતમ્યસ્તોત્રમ્

વિષ્ણુઃ સર્વોત્તમોઽથ પ્રકૃતિરથ વિધિપ્રાણનાથાવથોક્તે
બ્રહ્માણી ભારતી ચ દ્વિજફ‍ણિમૃઢાશ્ચ સ્ત્રિયઃ ષટ્ ચ વિષ્ણોઃ ।
સૌપર્ણી વારુણી પર્વતપતિતનયા ચેન્દ્રકામાવથાસ્માન્
પ્રાણોઽથો યોઽનિરુદ્ધો રતિમનુગુરવો દક્ષશચ્યૌ ચ પાન્તુ ॥ ૧॥

ત્રાયન્તાં નઃ સદૈતે પ્રવહ ઉત યમો માનવી ચન્દ્રસૂર્યૌ
ચાપ્પોઽથો નારદોઽથો ભૃગુરનલકુલેન્દ્રઃ પ્રસૂતિશ્ચ નિત્યમ્ ।
વિશ્વામિત્રો મરીચિપ્રમુખવિધિસુતાઃ સપ્ત વૈવસ્વતાખ્ય-
શ્ચૈવં વૈ મિત્રતારે વરનિરૃતિનામા પ્રાવહી ચ પ્રસન્નાઃ ॥ ૨॥

વિષ્વક્સેનોઽશ્વિનૌ તૌ ગણપતિધનપાવુક્તશેષાઃ શતસ્થા
દેવાશ્ચોક્તેતરે યે તદવરમનવશ્ચ્યાવનોચથ્યસંજ્ઞૌ ।
વૈન્યો યઃ કાર્તવીર્યઃ ક્ષિતિપતિશશબિન્દુઃ પ્રિયાદિવ્રતોઽથો
ગઙ્ગાપર્જન્યસંજ્ઞે શશિયમદયિતે મા વિરાટ્ ચાઽશુ પાન્તુ ॥ ૩॥

એભ્યોઽન્યે ચાગ્નિજાયા ચ જલમયબુધશ્ચાપિ નામાત્મિકોષા-
શ્ચૈવં ભૂમૌ તતાત્મા શનિરપિ તથિતઃ પુષ્કરઃ કર્મપોઽપિ ।
યેઽથાઽથોચાપ્યુતાનામિહ કથિસસુરા મધ્યભાગે સમાસ્તે
વિષ્ણ્વાદ્યા નઃ પુનાન્તુ ક્રમગદિતમહાતારતમ્યેન યુક્તાઃ ॥ ૪॥

વન્દે વિષ્ણું નમામિ શ્રિયમથ ચ ભુવં બ્રહ્મવાયૂ ચ વન્દે
ગાયત્રીં ભારતીં તામપિ ગરુડમનન્તં ભજે રુદ્રદેવમ્ ।
દેવીં વન્દે સુપર્ણીમહિપતિદયિતાં વારુણીમપ્યુમાં તા-
મિન્દ્રાદીન્ કામમુખ્યાનપિ સકલસુરાંસ્તદ્ગુરૂન્ મદ્ગુરૂંશ્ચ ॥ ૫॥

સર્વોત્તમો વિષ્ણુરથો રમા ચ બ્રહ્મા ચ વાયુશ્ચ તદીયપત્ન્યૌ ।
અન્યે ચ દેવાઃ સતતં પ્રસન્ના હરૌ સુભક્તિં મમ સન્દિશન્તુ ॥ ૬॥

ઇતિ શ્રીકલ્યાણીદેવિવિરચિતં તારતમ્યસ્તોત્રં સમ્પૂર્ણમ્ ।

*Taratamya Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*